( शोधलेख नाम - वैदिकवाङ्मय जलसंरक्षणम् )

UGC Approved Journal No – 40957
(IIJIF) Impact Factor- 4.172
Regd. No. : 1687-2006-2007
ISSN 0974 - 7648

# JIGYASA

## AN INTERDISCIPLINARY PEER REVIEWED REFEREED RESEARCH JOURNAL

Chief Editor : *Indukant Dixit*

Executive Editor : *Shashi Bhushan Poddar*

Editor
*Reeta Yadav*

Volume 12 | May 2019 | No. 4

*Published by*
PODDAR FOUNDATION
Taranagar Colony
Chhittupur, BHU, Varanasi
www.jigyasabhu.blogspot.com
www.jigyasabhu.com
E-mail : jigyasabhu@gmail.com
Mob. 9415390515, 0542 2366370

JIGYASA, ISSN 0974-7648, Vol. 12, No. IV, May 2019


- नई कृषि रणनीति द्वारा कृषि विकास 330-333
  **डॉ. राजबीर सिंह,** एसोसिएट प्रोफेसर, अर्थशास्त्र विभाग, किसान स्नातकोत्तर महाविद्यालय, बहराइच

- वैदिकवा¯मये जलसंरक्षणम् 334-339
  **डॉ. बृहस्पति मिश्र,** प्राध्यापकः श्रीशक्ति संस्कृत महाविद्यालय, श्री नयनादेवी जी, बिलासपुरम्, हि.प्र.

- भारतीय संस्कृति अस्मिता और सहिष्णुता का परिचायक 340-346
  ***रूद्र प्रताप सिंह,*** असिस्टेन्ट प्रोफेसर, हिन्दी विभाग, अरिग्नार अन्ना गवर्नमेंट आर्ट एंड साइंस कालेज, कारैकाल, पुदुचेरी

- आर.के.लक्ष्मण के व्यंग चित्रों में उदारीकरण, निजीकरण और वैश्वीकरण का प्रभाव 347-352
  ***प्रदीप विश्वकर्मा,*** शोध छात्र, व्यावहारिक कला विभाग, दृश्य कला संकाय, काशी हिन्दू विश्वविद्यालय, वाराणसी
  ***प्रो. हीरालाल प्रजापति,*** व्यावहारिक कला विभाग, दृश्य कला संकाय, काशी हिन्दू विश्वविद्यालय, वाराणसी

- भारतीय संस्कृति एवं पुस्तकालयों का विकास 353-367
  ***बृज किशोर पटेल,*** पुस्तकालयाध्यक्ष, आर.वी.पी.एस. गवर्नमेन्ट पी. जी. कॉलेज, उमरिया, म.प्र.; शोध छात्र, पुस्तकालय एवं सूचना विज्ञान, म.गां.चि.ग्रा.वि.वि. चित्रकूट, सतना, म.प्र.

- डॉ. राममनोहर लोहिया का इतिहास चक्र सिद्धान्त 368-370
  ***डॉ. राकेश कुमार यादव,*** असिस्टेन्ट प्रोफेसर इतिहास विभाग, श्री गाँधी स्मारक पी.जी. कालेज, समोधपुर, जौनपुर।

- कश्मीर समस्या : अतीत एवं वर्तमान 371-376
  ***शिवेन्द्र कुमार,*** शोधार्थी, इतिहास विभाग, ललित नारायण मिथिला विश्वविद्यालय, दरभंगा, बिहार

- आज और कल के लिए मूल्यों की शिक्षा : एक आवश्यक उपागम 377-380
  ***डॉ. त्रिवेणी सिंह,*** प्राचार्य, रणवीर रणंजय स्नातकोत्तर महाविद्यालय, अमेठी

- उपनिषद् वाङ्मय में यमनिरूपण 381-388
  ***डॉ. रवि कुमार शास्त्री,*** असिस्टेंट प्रोफेसर, योगविभाग, जे.जे.टी. विश्वविद्यालय, राजस्थान

# वैदिकवाङ्मये जलसंरक्षणम्

डॉ. बृहस्पति मिश्र *

अद्यत्वे जलविषयकं प्रसिद्धं सुभाषितम् "जलमेव जीवनम्"[1] इति। मनुष्यकृतैः स्वार्थलिप्साभिभूतैः योगायोग-मिथ्यायोग-द्वारा प्रदूषण-जन्यकारणैः जलमेव विषम्" इति कुभाषितम्- अद्यतनं वास्तविकं तथ्यम्। अशीतितः नवतिः प्रतिशतं रोगाः दूषितजलप्रयोगैः एव इति चिकित्सकानां मतम्[2]।

प्रदूषिते अद्यतनपर्यावरणे जलं कथं प्रकारकं, कुत्र कुत्र प्रदूषितम् जातम् अथवा प्रदूषितजलेन कियत् पर्यावरणं प्रदूषितम् अभवत्-इत्यादिविषयेषु पारिस्थितिकाध्ययननिरताः पर्यावरणविशेषज्ञाः प्रमाणम्।भारतीयसंस्कृत्याः आधारभूतान् अज्ञानान्धकारतिरस्कारकर्तॄन् प्रकाशाकरान् वेदान् सर्वसमस्या-समाधानज्ञापक-मन्यमानाः वेदानुरागिणः वैदिकाः जल-प्रदूषण-समस्यायाः समाधानम् अपि वेदेषु एव मन्यन्ते।

जल-प्रदूषण-निवारण-प्रकरणे द्वौ पक्षौ-

प्रथमस्तु-जलप्रदूषणं भवेत् एव न, तथाविधाः उपायाः करणीयाः।

द्वितीयः - प्रदूषितस्य जलस्य शोधनार्थम् उपायाः करणीयाः।

प्रथमपक्षः एव ऋषीणां प्रियतम इति भाति तच्च जल-प्रदूषणं भवेत् एव न। सुस्पष्टमेतत् 'पङ्कस्य क्षालनात् दूरात् अस्पर्शनं वरम्' इति प्राज्ञानां सिद्धान्तः।

प्रथमे पक्षेऽपि चिन्तनं द्विविधम्-

एकस्तु-जलपदार्थस्य महत्त्वज्ञापनम्, जलशक्तीनां बोधनम् तथा च जलतत्त्व-विषये मातृत्वरूपाः शिवत्वरूपादयः भावनाः मानवमनस्तु दृढतमाः करणीयाः येन लोभाभिभूते सत्यपि मानवे जलं प्रदूषितं नतु कुर्यात्।

अपरम् -साक्षात् जलतत्त्वस्य प्रदूषणरूपि हिंसानिषेधः। ऋषयः मानसिकशक्तिं प्रबलतरां स्वीकुर्वन्ति। मनोवैज्ञानिकाः अपि इदं तथ्यं प्रमाणीकुर्वन्ति यत् यदि मनसि दृढता अस्ति चेत् बाह्यप्रभावाः वशीकर्तुं समर्थाः न भवन्ति। अतएव वेदेषु सर्वत्र जलस्य कृते उच्चभावाः वर्णिताः सन्ति।

वैदिककोष-निघण्टुमतेन जलं जीवनं च शब्दौ समानार्थिनौ[3]। संस्कृतस्य एषा अप्रतिमा विशेषता वर्तते यत् शब्देषु एव तस्य पदार्थस्य महत्त्वं ज्ञातं भवति यथा-जलम्'दोषान् जलति अपवारयति' इति, जीवनं 'जीवयते प्राणिनः अनेन' इति, नीरम् 'निश्चयेन राति ददाति सुखम्' इति इत्थं प्रकारेण वैदिककोषे एकोत्तरशतं जल-पर्यायवाचिनाम् उल्लेखः निरुक्ते च तेषां व्याख्या प्राप्यते[4]।

एतासु निरुक्तिषु एकं तथ्यं स्पष्टं भवति यत् जलं 'तदैव दोषापवारणं करोति', 'तदैव जीवान् जीवयते', 'तदैव निश्चयेन सुखम् ददाति यदा निर्मलं हानिरहितं भवेत् अर्थात् जले एताः शक्तयः विद्यन्ते इति ऋषयःप्रमाणयन्ति।किन्तु एताभिः शक्तिभिः लाभाः प्राप्तव्याश्चेत् जलं विशुद्धं

---

* प्राध्यापकः श्रीशक्ति संस्कृत महाविद्यालय, श्री नयनादेवी जी, बिलासपुरम्, हि.प्र.